# श्रीसोमनाथसंस्कृतयुनिवर्सिटी ,वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल-२०१९

| | | |
|---|---|---|
| कक्षा–आचार्यप्रथमवर्षम्(SEM- 2) | **प्रश्नपत्रम् – 3** | गुणा: - ७० |
| विषय: - नव्यव्याकरणम् | **कोड – CC.4.2.5** | समय: - ११ त: ०२ |
| दिनाङ्क: - १२-०४-२०१९ | सन्दर्भग्रन्थः – प्रौढमनोरमा (षड्लिङ्गप्रकरणम् ) | |

.............................................................................................................

**प्रथमान्विति:**

**प्रश्न:-१ निम्नलिखितयोरेकस्य सूत्रस्य स्वपाठ्यपुस्तकानुसारं व्याख्या कार्या | (५)**

(१) अतो भिस् ऐस् |

(२) ख्यत्यात्परस्य |

**प्रश्न:-२ निम्नलिखितयोरेकस्य सूत्रस्य स्वपाठ्यपुस्तकानुसारं व्याख्या कार्या | (१०)**

(१) अर्थवदधातुरप्रत्यय: प्रातिपदिकम् |

(२) सरूपाणामेकशेष एकविभक्तौ |

द्वितीयान्विति:

**प्रश्न:-३ निम्नलिखितयोरेकस्य सूत्रस्य स्वपाठ्यपुस्तकानुसारं व्याख्या कार्या | (५)**

(१) याडाप: |

(२) सान्तमहतः संयोगस्य |

**प्रश्न:- ४ "विभाषा द्वितीयातृतीयाभ्यां" सूत्रस्य प्रौढमनोरमानुसारं व्याख्या कार्या | (१०)**

**अथवा**

"अस्थिदधिसक्थ्यक्ष्णामनङुदात:" सूत्रस्य यथाग्रन्थं व्याख्या कार्या |

**तृतीयान्विति:**

**प्रश्न:-५ निम्नलिखितयोरेकस्य सूत्रस्य स्वपाठ्यपुस्तकानुसारं व्याख्या कार्या | (५)**

(१) वा द्रुहमुहष्णुहष्णिहाम् |

(२) किम: क: |

प्रश्न:-६ "द्वितीयाटौस्स्वेन:" सूत्रस्य प्रौढमनोरमानुसारं व्याख्या कार्या | **(१०)**

**अथवा**

"उगिदचां सर्वनामस्थानेऽधातो:" सूत्रस्य यथाग्रन्थं व्याख्या कार्या |

**चतुर्थान्विति:**

**प्रश्न:-७ निम्नलिखितयोरेकस्य स्वपाठ्यपुस्तकानुसारं व्याख्या कार्या | (५)**

(१) अन्वादेशे नपुंसके एनद्वक्तव्य: (वा.) एनत्, एने, एतानि |

(२) बहूर्जि नुम्प्रतिषेधः, अन्त्यात् पूर्वो वा नुम्, बहूर्जि, बहून्र्जि वा कुलानि ।

प्रश्नः-८ "नहो धः" सूत्रस्य प्रौढमनोरमानुसारं व्याख्या कार्या । (१०)

अथवा

ऊह्यमेषां द्विर्वचनानुनासिकविकल्पनात् । रूपाण्यश्वाक्षिभूतानि भवन्तीति मनीषिभिः ॥
अस्य श्लोकस्य यथाग्रन्थं व्याख्या कार्या ।

**प्रश्नः-९ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशप्रश्नानां लघूत्तरं देयम ।** **(१०)**

(१) "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" सूत्रेऽस्मिन् 'अर्थवत्' पदे कस्मिन् अर्थे मतुप् -प्रत्ययो वर्तते ?

(२) 'यावकः' इत्यत्र कन्-प्रत्ययः कस्मिन् अर्थे अस्ति ?

(३) "कृतद्धितसमासाश्च" सूत्रे समासग्रहणं किमर्थं वर्तते ?

(४) स्त्रीप्रत्यये त्यदादिनियमो भवति न वा ?

(५) "आङि चापः" सूत्रेण आबन्तस्य अङ्गस्य कः आदेशो भवति ?

(६) "ङिति ह्रस्वश्च" सूत्रेण का संज्ञा भवति ?

(७) जश्शसोः स्थाने 'शि' आदेशः केन सूत्रेण भवति ?

(८) "यस्येति च" सूत्रे 'यस्य' पदे कः समासः ?

(९) "दिव औत्" सूत्रमिदं कस्मिन् प्रत्यये परे कार्यं करोति ?

(१०) "षट्चतुर्भ्यश्च" सूत्रेण कः आगमो भवति ?

(११) 'प्रशान्' इत्यत्र केन सूत्रेण मकारस्य स्थाने नकारादेशो भवति ?

(१२) "हलि लोपः" इत्यत्र "अलोऽन्त्यस्य" परिभाषासूत्रस्य प्रवृत्तिर्भवति न वा ?

(१३) "नहो धः" इति सूत्रेण हकारस्य स्थाने दकारविधाने सति 'नद्+त' इत्यवस्थायां तकारस्य स्थाने कस्य आपत्तिर्वर्तते ?

(१४) 'नद्+त' इत्यवस्थायां तकारस्य स्थाने नकारस्य आपत्तिः केन सूत्रेण विद्यते ?

(१५) 'असृक्' शब्दे को धातुर्वर्तते ?